[अत्र शूरेण कृष्णेन सह राधया बाहुवन्धनंज्ञेयं तमो त्विष्वं यों अर्चिर्षा वना विष्वा पश्वज कृष्णा कृष्णेति जिह्वया ।]
—सामवेद ४ प्रपाठक कृष्णराधेत्यर्थः

इन्द्रस्य सोम राधसे पुनानो हार्द्रिचोदय ।
—सामवेद ५ प्रपाठक

वयं ते सस्य राधसे वसोर्वसो पुरुस्पृहः । —सामवेद ५ प्रपाठक
मत्सि वायु मिष्टये राधसे नो मत्सि मित्रा वरुणा पूयमानः ।
—सामवेद ५ प्रपाठक

त्वंहि राधसस्पते राधसो महः क्षयस्यासि पिधर्ता ।
CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy
—सामवेद ५ प्रपाठक

दाता राधस्तुवते काम्यं वसु प्रचेतन सैनं सश्च देवो देवं सत्य इन्दुः सत्य इन्द्रम् । —सामवेद ६ प्रपाठक

स्तोत्रं राधानां पते गिर्वाहो वीर यस्यते ।

—सामवेद ७ प्रपाठक

मन्दन्तु त्वा मधवन् निन्द्रन्दवो राधोदेयाय सून्वत् ।

—सामवेद ८ मण्डल ३ अर्द्ध प्रपाठक

सामवेदे ४ प्रपाठके कृष्णलीला यथा—

हरि क्रीडन्तं मम्य नूषत स्तुभोपिधेनवः भयसेद शिपयु ।

[अयं मन्त्राः वैदिक यन्त्रालय अजमेर मुद्रालये मन्त्र संहितायां दर्शिता यथा विहिता संग्रहीता । सम्पादकः,]

२३ —अथर्ववेदे 'राधस' पदवाच्य मन्त्राः यथा--

न 'राधसो राधसो' नूतनस्येन्द्रनकिर्दद्दश इन्द्रियं ते ।

—अथर्ववेद ६ मण्डल ३ अध्याय २७ सूक्त

उद भ्राणीव 'स्तनयन्निर्यतीन्द्रो' राधां स्यश्यानि गव्या ।

—अथर्ववेद ६ मण्डल ४ अध्याय ४४ सूक्त

'राधां सि' या द्वानाम् ।

—अथर्ववेद ८ मण्डल २ अध्याय ६ सूक्त

आनो विश्वान्यशिवनाधतं राधां स्यह्नया ।

—अथर्ववेद ८ मण्डल २ अध्याय ८ सूक्त

न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः ।

—अथर्ववेद ८ मण्डल ३ अध्याय १४ सूक्त

यदिन्द्र राधो अस्तिते माधो न मद्यवत्तम ।

—अथर्ववेद ८ मण्डल ६ अध्याय ५४ सूक्त

त्वहि राधस्पते राधसो महः क्षयस्यासि निधत्तः ।

—अथर्ववेद ८ मण्डल ७ अध्याय ६१ सूक्त

सविता चित्र 'राधाः' । —अथर्ववेद ५ अनुवाक् सूक्त २६

विष्णोः पत्नि तुभ्यं राता हर्वोंषि पतिदेवि 'राधसे'चोदय स्व ।

—अथर्ववेद-अनुवाक् ४ सूक्त ४६

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इन्द्रं वय मनु 'राधं' हवामहे नु राध्या स्म द्विपदा चतुष्पदा ।
—अथर्ववेद १९ काण्ड १५ अनुवाक्

कदा मर्त मराधसं पदाक्षुम्य मिव स्फुरत । कदा न शुश्रुवद गिर इन्द्रो अङ्ग
—अथर्ववेद ५ अनुवाक् ६३ सूक्त

आमध्वो अस्या असिचन्न मत्र मिन्द्राय पूर्ण सहि सत्य राधाः ।
—अथर्ववेद ७ अनुवाक् ७६ सूक्त

त्वं दाता प्रथमो 'राधसा' मस्यसि सत्य ईशान कृत् ।
— अथर्ववेद ९ अनुवाक् १०४ सूक्त

सुकृत् सुते महता शूर राधसा नु स्तोम मुदीमहि ।
—अथर्ववेद ९ अनुवाक् ११६ सूक्त

इदं राधो विभु प्रभु इदं राधो वृहत् प्रथु ।
—अथर्ववेद ९ अनुवाक् १३५ सूक्त

येनो राधां स्यश्व्या गव्या भजन्त सूरयः सुजाते अश्व सूनृते ।
—अथर्ववेद ५ मण्डल ६ अध्याय

मन्त्रेन्द्रादि शब्देन श्रीकृष्णपदं ग्राह्यम् ।
राधस शब्देन श्रीराधैव पदं ग्राह्यम् ।।

परोक्ष प्रियाहिवेदाः ।

य आत्मनि तिष्ठन् यस्यात्माशरीरं ।। —श्रुते यः आत्मनि स्व स्वरूपे तिष्ठन् राधा आत्मा देहो यस्येति ।। लघु मंजूषायाम् ।। राधा कृष्ण भूषणे उद्धृतं ।।

२४–उपनिषद द्वारा–श्रीराधा यथा–

स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीय मैच्छत् ।
वृहदारण्यकोपनिषदि चतुर्थ ब्राह्मणतः ।

सः लीला पुरुषोत्तमः कृष्णः । नैव रेमे । तस्मादेकी भूतत्वात् । स द्वितीयं । राधां । ऐच्छदित्यर्थः ।

वह लीला पुरुषोत्तम श्रीकृष्ण अवतार लेकर भी लीला विस्तार नहीं कर सके । राधा माधव मिलित एक रूप होने से ।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

अतः ह्लादनी शक्ति रूपा श्रीराधा को प्रकट किया। यह 'वृहदारण्यक' उपनिषद में चतुर्थ ब्राह्मण में लिखा है।

रसो वै सः। रसँ ह्येवायं लब्ध्वानन्दी भवति। कोत्येवान्यात्कः प्राण्या यदेष आकाश आनन्दो न स्यात्। एषाह्येवानन्दयति।

तैत्तिरीयोपनिषदि। आनन्दवल्ली सप्तमोनुवाकतः।

आस्वादन वस्तु 'रस' निश्चय श्रीकृष्ण ही हैं। जिसे पाकर जीव आनन्द प्राप्त करता है। उससे परे और क्या वस्तु है ऐसा कोई स्थान ही नहीं है। वह आनन्द के अधिष्ठान 'कृष्ण' नहीं है। परन्तु उनको भी आनन्द देने वाली यह ह्लादिनी स्वरूपा राधा हैं। यह तैत्तिरीत उपनिषद में आनन्द वल्ली के सप्तम अनुवाक में लिखा है।

अयमात्मा ब्रह्मेति। अयं। श्रीकृष्णस्य। आत्मा। श्रीराधेति। शक्ति शक्तिमतोरभेदात्। ब्रह्मएवयेति इति श्रुत्यर्थः। [विशुद्धरस दीपकायां रेमे श्लोके टीकयां दत्तमिति]

यह श्रीकृष्ण की 'आत्मा' रूपा 'राधा' शक्ति मान में अभेद होने से कृष्ण ही हैं।

यद्गन्धर्वेति विश्रुता। ह्लादिनी या महाशक्तिः सर्वशक्ति चरीयसि। तत्सार भोगरूपां या मिति तन्त्रे प्रतिष्ठिता। सुष्टु कान्त स्वरूपेयं सर्वदा वार्षभानवी धृतषोड़ष श्रृङ्गाराद्वादशाभरणाश्रिता। गोपालोत्तर तापिन्योपनिषदि।

जिनका गान्धर्वा नाम है। सब शक्तियों में श्रेष्ठ जो ह्लादिनी महाशक्ति है उसकी सार रूपा श्रीराधा हैं। निश्चय कृष्ण स्वरूपा ही हैं, श्रीवृषभानु गोप के यहाँ जन्म लेकर कृष्ण के मिलन के लिये षोड़ष श्रृङ्गार द्वादश आभरण धारण करती हैं—यह तन्त्रों में लिखा है। यह गोपाल तापिनी उपनिषद में लिखा है।

कृष्णो ह वै हरिः परमो देव इत्यादि·······एवं हि तस्य शक्तयस्त्व नेक धेत्मादि·······तास्वाह्लादिनी वरीयसी मरमान्तरङ्ग भूता राधा, कृष्णेन आराध्यत इति राधा कृष्णं समाराधयति सदेति राधिका गन्धर्वेति व्यायदेश्यत इति। ये यं राधा यश्च कृष्णे रसाब्धिर्देहेतैकः क्रीड़नार्थं द्विधाभूत।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

एषावै हरेः सर्वेश्वरी सर्वविद्या सनातनी कृष्ण प्राणाधिदेवी चेति विविक्ते वेदाः स्तुवन्ति यस्या गतिं वक्तुं न चोत्सहन्ते। सैव यस्य प्रसीदति तस्य करतलावकलित धामेति। एतामवज्ञाय यः कृष्ण माराधयतु मिच्छति सगूढ़ तमो मूढ़तमश्चेति। अथ हैतानिनामानि गायन्ति श्रुतयः।

राधा रासेश्वरी रम्या कृष्ण मन्त्राधि देवता,
सर्वाद्या सर्ववन्द्या च वृन्दावन विहारिणी।

वृन्दा राध्या रमाऽशेष गोपीमण्डल पूजिता,
सत्या सत्य परा सत्यभामा श्रीकृष्ण वल्लभा।

वृषभानु सुता गोपी मूल प्रकृतिरीश्वरी,
गन्धर्वा राधिका रम्या रुक्मिणी परमेश्वरी।

परात्परतरा पूर्ण पूर्ण चन्द्र निभानना,
भुक्ति मुक्तिप्रदा नित्यं भवव्याधि विनाशिनीति।

राधोपनिषदि—अष्टोत्तरोपनिषदि ५२५ पृष्ठ

२५—तन्त्र द्वारा—श्रीराधा यथा—

देवी कृष्णमयी प्रोक्ता राधिका परदेवता,
सर्व लक्ष्मीमयी सर्वकान्तिः सम्मोहिनीपरा।

—बृहत् गौत्तमीय तन्त्रे

जो कि प्रकाशमान हैं, कृष्ण की सेवा के निमित्त ही सर्वाङ्ग जिनका निर्माण हुआ है, आराधन धर्म प्राधान्य होने से जो राधिका हैं, पर देवता हैं, सब लक्ष्मी रूपा हैं, सब कान्तिमयी सम्मोहिनीपरा शक्तिरूपा हैं।

सत्वं तत्वं परतत्वं च तत्वत्रय महंकिल,
त्रितत्व रूपिणी सापि राधाधिका परदेवता।

—बृहत् गौत्तमीय तन्त्रे

सत्वं कार्य्यं तत्वं कारणं परतत्वं ततोऽपि भिन्नत्वमित्यर्थः।
[विशुद्धरस दीपिका टीकायां 'रेमे' श्लोके]

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

सत्व—गुण कार्य तत्व अर्थात् उन सत्वादि गुणों के सूक्ष्म रूप

तन्मात्र उससे भी भिन्न तुरीयतत्व स्वयं श्रीकृष्ण हैं। उसी प्रकार त्रितत्व रूपिणी वह राधिका जी भी परदेवता हैं (यह विशुद्धरस-दीपिका टीका मे "रेमेतया" व्याख्या में लिखा है।)

राधिका पद्मिनी या सा कृष्ण देवस्य वाग्भवा,
कृष्णदेवः समुद्भूतः कृष्णः पद्मदलेक्षणः।

—राधा तन्त्रे २४ पटले ४ श्लोकः

जो पद्मिनी संज्ञका राधा हैं, वह कृष्णचन्द्र की वाणी से प्रकट हुयी हैं जैसे कि कृष्णदेव स्वयं उद्भूत हैं। श्याम कमलदल से उनके नयन हैं।

केचिच्छ्रिय त्वां कतिचिच्च गौरीं परे परेशींब्रुवते कवीन्द्राः,
परात्परं ब्रह्म सनातनत्वं गुणत्रयेणैव बिभर्ति लोकम्।

—मूर्द्धान्माय तन्त्रे राधा स्तवराजे

श्रीत्वेन तदेकाश्रयत्वं। 'गौरी' त्वेनार्द्धाङ्गीत्वं। परेशी त्वेन तादात्समिति। स्वरूपतस्तु—"तुरीयं त्रिषु सन्ततमि" त्यादिन्यायेनं परादपि परं यद्ब्रह्म तदेव त्वं परस्याप्यात्मेति [इति विशुद्धरस दीपिका टीकायां व्याख्या।]

कोई तुम्हें 'श्री' बतलाते हैं अर्थात् एक आश्रय तत्व हो। कोई भक्त तुम्हें गोरी कहते हैं अर्थात् अर्द्धांगिनी हो। किसी ने तुम्हें परा नाम से कहा है अर्थात् परतत्व की अधिष्ठात्री हो। स्वरूप में जो तुरीय हैं, तीनों काल में विराजमान पर वस्तु से भी है। ब्रह्म की भी आत्मा होने से उनमें तुममें अभेद है। जगत् का संरक्षण गुणत्रय द्वारा तुम्हारे से होना असम्भव नहीं है।

घना वृते व्योम्नि दिनस्यमध्ये
भाद्रे सिते नागतिथौ च सौमे,
अवाकिरन्न देवगणा स्फुरन्ति
तन्मन्दिरे नन्द न जैः प्रसूनैः।

—गर्ग संहितायां गोलोक खण्डे ८ अ० ७ श्लोक

वर्षाऋतु मध्याह्नकाल भाद्र शुक्ल अष्टमी चन्द्रवार में 'रावल' ग्राम में श्रीराधा प्रकट हुयीं उस काल में देवगणों ने नन्दन वन के प्रसूनों की जन्मस्थान पर वर्षा की।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसि तत्सार भूता ।। गौत्तमीय तन्त्रे ।।

तत्र राधा तापिन्याम्—

राधेति परमा प्रकृतिः सैव लक्ष्मीः सा सरस्वती सैवलोक कर्त्री लोक माता देव जननी गोलोक वासिनी गोलोक नियन्त्री वैकुण्ठाधिष्ठात्रीति ।

सैषाहि राधिका गोपीजन स्तस्याः सखीजनः ।
—गोपाल तापिन्याम् राधाकृष्ण भूषण ग्रन्थे उद्धृतम्

ममदेह स्थितैः सर्वै देवै व्रह्म पुरोगमैः ।
आराधिता यत स्तस्माद् राधेति परि कीर्तिता ।।
—कृष्णयामले १४ अध्याय

आनन्दात्मात्मया शक्त्या राधया सहितो हरि,
नर्तयन्नर्तयामास शक्ति तां तालभेदतः ।
—शैवादिसंमतायां सूतसंहितायाम्

मृत्युञ्जयतंत्रे—
सर्वलक्ष्मी मयी देवीं परमानन्द नन्दितां ।
रासोत्सव प्रियां राधां कृष्णानन्द स्वरूपणीम् ।।

सम्मोहन तन्त्रे---
चिन्तयेद् राधिकां देवीं गोप गोकुल लंकुलां ।

तस्या श्रेष्ठत्वं आदिवाराहे—
गङ्गायाश्चोत्तरं गत्वा देव देवस्य चक्रिणः,
अरिष्टेन समं तत्र महद् युद्धं प्रवर्तित ।
घातिथित्वा ततस्तास्मिन्नरिष्टं वृषरूपिणं,
कोपेन पार्ष्णिघातेन महातीर्थं प्रकल्पितं ।
स्नातस्तत्र त्वदा हृष्टो वृषं हत्वा सगोपकः,
विपाप्मा राधिकां प्राह कथं भद्रे म विष्यति ।
तदा राधा समाश्लिष्ठ कृष्णमक्लिष्ठ कारिणं,
स्वनाम्ना विदितं कुण्डं कृतं तीर्थं मदूरतः ।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

राधाकुण्ड मितिख्यातं सर्व पाप हरं शुभं,
अरिष्टहन् राधाकुण्डस्नानात् फलमवाप्यते ।
राजसूयाश्व मेधाभ्यां नात्रकार्या विचारणा,
गोहत्या ब्रह्महत्यादि पापं क्षिप्रं प्रणश्यति ।

तथा व्रतरत्नाकार धृतं भविष्यपुराणे च—

बालोपि भगवान् कृष्ण स्तरुणं रूप माश्रितः,
रेमे विहारै विविधैः प्रियमा सह राधया ।

एवं गोपालतापिन्या—'यद्गन्धर्वीति विश्रुता' सातु सैवज्ञेया । अतएव श्रीराधा सम्बलित दामोदर पूजा पाद्मे कार्तिके विहिता—"मयासह" । अत्र 'मा' शब्द प्रयोग स्तस्याः परम लक्ष्मीरूपत्वात् । तथा तत्रैव—गृहाणर्घ्यं मया दत्तं राधयासहितो हरेः । इति साक्षान्नामोक्तं ।

श्रीगोपालभट्टेन हरिभक्ति विलासे—कार्तिक मास कृत्ये बहुलाष्टम्यां पाद्म वचनं किञ्च तत्रैव श्रीराधिकोपाख्यानान्ते—वृन्दावनाधिपत्यं च दत्तं तस्या प्रहृष्यता कृष्णेनान्यत्र देवीतु राधा वृन्दावने वने ।

टीका च—

तस्याः तस्यै श्रीराधायै । अन्यत्र वृन्दावनेतरस्थाने सा देवी लक्ष्म्यादि रूपा वृन्दावनाख्ये च वने राधैव स्वयं स्वनामादिनैव प्रसिद्धेत्यर्थः ।

अचिन्त्यभेदाभेदमते । श्रीमाध्वगौड़ेश्वराचार्य श्रीरूपगोस्वामिभिः कथितं यथा—महाभाव स्वरूपेयं । तथा च—ह्लादिनीया महाशक्तिः सर्व शक्तिर्ववरीयसि तत्सार भाव रूपेयमिति । [उज्वले ७५–७६ पृष्ठे ।]

अनया राध्यते कृष्णो भगवान् हरिरीश्वरः ।
लीलया रस वापिन्या तेन राधा प्रकीर्तिता ।।

नारदपञ्चरात्र्ये—

गोपना दुच्यते गोपी श्रीराधा राधिका मिता । [illegible]तायां ।।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

देवीकृष्णमयी ज्ञेयाराधिका पर देवता।
सर्वलक्ष्मी स्वरूपा च श्रीकृष्णानन्द दायिनी ।।
—नारद पञ्चरात्ये

२६—आगम द्वारा—श्रीराधा यथा—

यः शक्रयः समाख्याता गोपी रूपेण ताः पुनः,
सख्यो भूत्वा राधिकायाः कृष्णचन्द्र मुपासते।
—श्रीकृष्णयामले विशुद्धरसदीपिका टीकायाम्

जो कि इन्द्रादि देवों की आज्ञा से गोपी रूप से प्रकट होकर श्रीस्वामिनी राधिकाजी की सखी होकर श्रीकृष्णचन्द्र की उन देव कन्याओं ने सेवा की।

हरे रर्द्ध तनू राधा राधिकार्द्ध तनूहरिः।
अनयो रन्तरादर्शी मूर्त्यवच्छेदकोऽधमः ।।
—श्रीनारद पञ्चरात्ये

अत्र तनुशब्दः स्वरूप वचनः—इति सैव टीकायां। श्रीहरि की अर्द्ध तनू राधा हैं अर्थात् स्वरूप हैं। श्रीराधिका का आधा तनू (स्वरूप) श्रीकृष्ण हैं। जो साधक दोनों में भेद देखता है |वह एक मूर्ति की टुकड़े करने का दोषी है, अतः अधम है।

तत्प्रिया प्रकृति स्वाद्या राधिका तस्य वल्लभाः,
तत्कला कोटि कोटयंशा दुर्गाद्यास्त्रिगुणात्मिका।
एतस्यांध्रि रज स्पर्शात् कोटि विष्णुः प्रजायते।
—वाराह संहितायाम् वृन्दावन रहस्ये

श्रीगोविन्द की आद्या प्रकृति जितनी प्रियाओं में श्रीराधिका अत्यन्त प्यारी हैं, जिनकी कोटि कोटि कला त्रिगुणात्मिका दुर्गा से आदि लेकर शक्ति हैं। इन्हीं के चरण रज के स्पर्श से कोटि विष्णु पैदा हैं।

२७—पुराण द्वारा—श्रीराधा यथा—

यथा राधा प्रिया विष्णो स्तस्या कुण्डं प्रियं तथा।
सर्व गोपीषु सैवैका विष्णो रत्यन्त वल्लभा ।।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

—पद्मपुराणोत्तर खण्डे

जैसे सब गोपियों में श्रीकृष्णसेवानिष्ठा श्रीराधा जी श्रीकृष्ण चन्द्र जी की अत्यन्त प्यारी हैं, इसी प्रकार श्रीकृष्ण को उनका कुण्ड —राधाकुण्ड भी प्यारा है।

वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे।
रुक्मिणी द्वारवत्यांतु राधा वृन्दावने वने॥

—मत्स्यपुराणे

जैसे वाराणसी में विशालाक्षी पुरुषोत्तम क्षेत्र में विमला द्वारिका में श्रीरुक्मिणी प्रसिद्ध हैं, उसी प्रकार श्रीवृन्दावन में अधीश्वरी 'राधा' प्रसिद्ध हैं।

तत्राति राधिका शश्वदति प्राणप्रिया हरे,
किमहं वर्णये भाग्यं राधायाः परमाद्भुतम्।
ब्रह्मादयोपि न विदुः परमानन्द मन्दिरं।

—आदि पुराणे षष्ठाध्याय ८-९ श्लोक

भृङ्गराज कहते हैं कि श्रीवृषभानु के वंश में 'श्रीराधिका' श्रीहरि गोविन्द की सर्वदा अत्यन्त प्राण प्रिया हैं। इनका परमाद्भुत भाग्य कौन वर्णन कर सकता है। ब्रह्मादिक भी इनका महत्व नहीं जानते। यह आनन्द स्वरूप श्रीकृष्ण की मन्दिर रूपा हैं अर्थात् आश्रय पदार्थ हैं।

आदौ राधां सुमुच्चार्थ पश्चात्कृष्णं परात्परं,
स एव पण्डितो योगी गोलोकं याति लीलया।

—ब्रह्मवैवर्त कृष्ण खण्डे गणेश वाक्यं। १२४ अ० १० श्लोक

पहिले राधा नाम उच्चारण कर फिर परात्पर कृष्ण का नाम जो लेता है वही पण्डित योगी अर्थात् चित्तवृत्ति निरोधी है। वह सहज में गोलोकगामी हो जाता है।

श्रीब्रह्मवैवर्त पुराणे राधिकोत्पत्तिवर्णनं यथा—

पुरा वृन्दावने रम्ये गोलोके रास मण्डले,
रत्न सिंहासने रम्ये तस्थौ तत्र जगत्पतिः।
स्वेच्छा मयश्च भगवान् वभूवैरमणोत्सुकः,
रमणं कर्तुं मिच्छाच तद्बभूव सुरेश्वरि।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

एतस्मिन्नन्तरे दुर्गे द्विधा रूपो वभूव सः,
दक्षिणाङ्गश्च श्रीकृष्णो वामांगं सा च राधिका।
तस्याश्चांशांश कलया वभूवुर्देवयोषितः,
वभूव गोपी संघाश्च राधाया रोम कूपतः।
राधा वामांश भागेन महालक्ष्मीर्वभूव सा,
स्वयं राधा कृष्णपत्नी कृष्ण वक्षः स्थलास्थिता।
प्राणाधिष्ठातृ देवी च तस्यैव परमात्मनः,

—प्रकृति खण्ड ४८ अ०

पहिले गोलोक में श्रीवृन्दावन रासमण्डल में रत्नसिंहासन पर जगत्पति श्रीकृष्ण विराजमान थे—

स्वेच्छामय कृष्ण के खेलने की इच्छा उदय हुयी कि मैं कोई प्रिया उत्पन्न करूँ—उसी समय कृष्ण 'दो' रूप हो गये। दक्षिणाङ्ग कृष्ण और वामाङ्ग 'राधिका'।

श्रीराधिका जी के अंशांश कला से देवकन्या पैदा हुयीं। श्रीराधिका जी के रोम कूप से अनन्त व्रजगोपियाँ जन्मीं।

श्रीराधिका जी के वामांश भाग से 'महालक्ष्मी' विष्णुप्रिया प्रकट हुयीं—यह स्वयं स्वरूप श्रीकृष्ण की नित्य पत्नि स्वयं स्वरूपा श्रीराधा श्रीकृष्ण वक्षः स्थिता हैं। उन परम प्रेमास्पद कृष्णचन्द्र की प्राणाधिष्ठातृ देवी हैं।

ब्रह्मवैवर्त पुराणे-भगवता राधा तत्वं वर्णित यथा—

श्रीकृष्ण उवाच—

त्वं मे प्राणाधिका राधा प्रेयसी प्रेयसी परा,
यथा त्वं च तथाहं च भेदो हि नावयोः ध्रुवम्।
यथा क्षीरेच धावल्यं यथाग्नौ दाहिका सति,
यथा प्रथिव्यां गन्धश्च तथा हं त्वयि सन्ततम्।
विनां मृदा घटं कर्तुं बिना स्वर्णेन कुण्डलं,
कुलालः स्वर्णकारश्च नहि शक्तः कदाचन।
तथा त्वया बिना सृष्टिं न च कर्तुं महंक्षमः,
सृष्टे राधारभूता त्वं बीज रूपोऽहमच्युतः।

—श्रीकृष्ण जन्म खण्ड १५ अ० ५७ से ६० श्लोक

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

रा शब्दोच्चारणाद्भक्तो राति मुक्ति सुदुर्लभां
धा शब्दोच्चारणाद्दुर्गे धावत्येव हरेः परम् ।
—प्रकृति खण्डे ४८ अ० ४० श्लोक

श्रीकृष्णचन्द्र ने कहा कि हे राधे ! तुम मुझे प्राणों से भी अधिक प्यारी हो । सब प्रेयसियों में परा प्रेयसी हो । तुम और मैं का भेद निश्चय ही हम दोनों में नहीं है ।

जिस प्रकार दूध में सफेदी, अग्नि में दाहकता शक्ति, पृथ्वी में गन्ध गुण पृथक नहीं, उसी प्रकार हम दोनों सतत् मिले हुये हैं ।

जिस प्रकार मृत्तिका के बिना घट नहीं बन सकता, सुवर्ण के बिना कुण्डल कुलाल स्वर्णकार नहीं रचना कर सकते हैं, उसी प्रकार इस लीला की रचना आपके बिना मैं करने को सक्षम नहीं हूँ ।

प्रेम राज्य की सृष्टि रचना करने की आधार भूता तुम हो और बीज रूप, अच्युत मैं हूँ ।

'रा'-शब्द के उच्चारण करने से भक्तों को सुदुर्लभ मुक्ति की प्राप्ति होती है ओर 'धा'-शब्द के उच्चारण करने से परब्रह्म श्रीकृष्ण हृदय में आकर विराजमान हो जाते हैं ।

राधा कृष्णात्मिका नित्यं कृष्णो राधात्मकोध्रुवं ।

—ब्रह्माण्डे-निम्बार्काचार्यकृत दशश्लोकी व्याख्यायां लघु मंजूषायाम्—

राम सहस्रनाम रसु यथा—

राधारूपी रामचन्द्रो राधामोहनः मोहनः राधा मन्त्र स्वरूपात्मा ।

गोप्यः प्रपच्छु रुषसि कृष्णानुचरमुद्धवं ।
हरिलीला विहारांश्च तत्रैकां राधिका विना ।
राधा तद्भाव संलीना वासनायां विरामिता ॥

तोषिण्यां वासना भाष्ये-अग्निपुराणे—भाद्रे मासिसितेपक्षे या पवित्राष्टमी तिथिः । राधा जन्मोत्सवं तत्र कारयेत् कृष्ण सेवकः ॥ मध्याह्ने वृश्चिके लग्ने ज्येष्ठायाः सप्तमेपदे । विप्रा मुहूर्तेऽभि जीति जाता राधा हरि प्रिया ।

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

स्वधर्म निर्णयामृतसिन्धौ-भविष्योत्तर पुराणे—विष्णोरष्टमी।

—यजुर्वेद २५ अध्याय

तत्र गत्वा च तै सर्द्धि समुवास जगत्पतिः,
दृष्ट्वा रासं विस्मतास्ते बभूवुर्मुनिसत्तम।
आविर्वभूव कन्यैका कृष्णस्य वाम पार्श्वतः,
धावित्वा पुष्प मानीय ददावर्घ्यं प्रभोः पदे।
रासे संभूय गोलोके सादधाव हरेः पुरः,
तेन'राधा' समाख्याता पुराविद्भि र्द्विजोतम।
प्राणाधिष्ठातृ देवीसा कृष्णस्य परमात्मनः,
आविर्वभूव प्राणेभ्यः प्राणेभ्योपि गरीयसि।

—ब्रह्मवैवर्ते ब्रह्मखण्डे ५ अध्याय २४ से २७ श्लोक

तत्र गोलोके 'तैब्रर्शक्तिभिस्सार्द्ध मिति'।

भगवान् गोलोकपति कृष्ण गोलोक धाम में अपनी सब शक्तियों के सहित जब रास करने लगे उस समय सबको अत्यन्त आश्चर्य हुआ। उसी काल में कृष्णचन्द्र के बायें अङ्ग से एक कन्या प्रकट हुयी। वह दौड़कर प्रभू के पद में पुष्पाञ्जलि देने लगी। गोलोक में रास में श्रीहरि का वाम भाग ग्रहण किया। इसी से इनका नाम 'राधा' हुआ। तत्व वेत्ताओं ने कृष्णाराधन करने वाली होने से इन्हें राधा कहा है। यह श्रीकृष्णचन्द्र प्राणाधिष्ठात्री देवी हैं। भगवान् कृष्ण के प्राणों से आविर्भूत होने से यह प्राणप्यारी हैं।

तासांतु मध्ये या देवी तप्त चामीकर प्रभा,
द्योतमानादिशः सर्वाः कुर्वती विद्युदुज्वलाः।
प्रधानं या भगवती यया सर्वमिदं ततम्,
सृष्टि स्थित्यन्त रूपा या विद्याविद्या त्रयीपरा।
स्वरूपा-शक्ति रूपा च माया रूपा च चिन्मयी,
ब्रह्मा विष्णु शिवादीनां देह कारण कारणम्।
चरा-चरं जगत् सर्व यन्माया परिरम्भितं,
वृन्दावनेश्वरी नाम्ना राधा धात्रानु कारणात्।
तमालिंग्यं वसन्तं तं मुदा वृन्दावनेश्वरं।

—पद्मपुराणे

उन सब गोपियों में मुख्य श्रीमती जी बिजली के समान जो

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

दशों दिशाओं को प्रकाश देने वाली हैं, जो प्रधान प्रकृति है, जो सृष्टि पालन संहार करने वाली हैं, 'विद्या' 'अविद्या' परा नाम से विख्यात हैं, ब्रह्मादिकों की कारण एवं चर अचर जगत् जिसकी माया से मिला हुआ है, वह वृन्दावनेश्वरी श्रीराधा ही हैं, जिनका आलिङ्गन कर वृन्दावनेश्वर आनन्दित होते हैं।

मूल प्रकृतिरेका साराधा परि कीर्तिता।

—ब्रह्मवैवर्ते ब्रह्मखण्डे ३० अध्याय

भज राधां निर्गुणांच प्रदात्रीं सर्व सम्पदां।

—पाद्मे पाताल खण्डे ६९ अध्याय

सर्व लक्ष्मी स्वरूपासा राधिका पर देवता।

—श्रीनारदीये

गौरंतु राधिका रूपं राध्यते पुरुषोत्तमः,
सर्वावस्थासु देवेशः श्रियो रूपान्तरं हितत्।

इति नारदपञ्चरात्रे ब्रह्मसंहितायां तृतीयपादे द्वितीयाध्याये

'राधा' शब्दस्य व्युत्पत्ति सामवेदे निरूपिता।
सुरासुर मुनीन्द्राणां वाञ्छितां मुक्तिदां परा,
रेफोहि कोटि जन्माघं कर्म भोगं शुभाशुभं।
आकारो गर्भवासं च मृत्युञ्च रोग मुत्सृजेत्,
धकारमायुषो हानि माकारो भव बन्धनम्।
श्रवण स्मरणोक्तिभ्यः प्रणश्यति न संशयः,
रेफोहि निश्चलां भक्ति दास्यं कृष्ण पदाम्बुजे,
सर्वेप्सितं सदानन्दं सर्व सिद्धौघ मीश्वरम्।
धकारः सहवासञ्च तत्तुल्य काल मेव च,
ददाति सार्ष्णि सारूप्यं तत्व ज्ञानं हरेः स्वयम्।
आकार स्तेजसो राशिं दान शक्ति हरौ यथा,
योग शक्ति योग मतिं सर्वकाल हरि स्मृतिम्।

'ब्रह्मवैवर्त पुराण' कृष्ण जन्म खण्ड (१३) अध्याय

'राधा-शब्द' की व्युत्पत्ति सामवेद में निरूपण की गई है। वह श्रीराधा सुर-असुर मुनियों को परम वाञ्छित मोक्ष की देने वाली हैं। राधा शब्द का 'र' कार कोटि जन्म के शुभाशुभ कर्म

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

भोगों से और 'आ' कार गर्भवास रोग और मृत्यु से छुड़ाता है। 'ध' कार आयुष्य की हानि से और 'आ' कार कहने सुनने और सुनाने से निस्सन्देह भव बन्धन को छुड़ाता है। 'र' कार निश्चल भक्ति तथा श्रीकृष्ण के चरणारविन्द में सर्ववाञ्छित सदानन्ददायक सर्वसिद्ध ऐश्वर्ययुक्त दास्यता एवं शरणागति प्रदान करता है। 'ध' कार अनन्तकाल तक स्वयं हरि का सहवास एवं सारूप्य तथा तत्व ज्ञान प्रदान करता है। 'अ' कार अमित तेज 'दान की शक्ति' योग की शक्ति एवं योग की मति सब काल में हरि का स्मरण कराता है।

राधेत्येवं च संसिद्धा राकारोदान वाचकः,
स्वयं निर्वाणधात्री या सा राधा परिकीर्तिता।
'रा' च रासे च भवना 'द्धा' एव धारणादहो,
हरेरालिङ्गनाधारात्तेन राधा प्रकीर्तिता।

ब्रह्म वै० कृ० ख० १७ अध्याय नारद नारायण सम्वाद

'राधा' यह शब्द स्वयं सिद्ध है औ 'रा' कार दान वाचक है। स्वयं निर्वाणधात्री (मोक्षकीधाम) होने से वह 'राधा' कहलाती हैं। 'रा' अर्थात् रास में होने से 'धा' अर्थात् धारण करने से अथवा रास में भगवान् हरि की आधार भूता होने से ही वह राधा नाम से प्रसिद्ध हैं।

जगन्माता च प्रकृति पुरुषश्च जगत्पिता,
गरीयसित्रिजगतांमाता शत गुणैः पितुः॥

राधा कृष्णेति गौरीशेत्येवं शब्दः श्रुतौश्रुतः,
कृष्ण राधेश गौरीति लोके न च कदा श्रुतः॥

आदौ पुरुष मुच्चार्य्य पश्चात्प्रकृतिमुच्चरेत्,
स भवे मातृगामीच वेदातिक्रमणे मुने॥

—ब्रह्मवैवर्त पुराण ५२ अध्याय

योगमाया परा प्रकृति रूपा श्रीराधा श्रीकृष्ण की प्राणप्रिया होने के कारण ही उनका नाम पुरुष रूप परमात्मा श्रीकृष्ण के नाम के साथ संयुक्त है—

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अतः जगन्माता प्रकृति है, जगत्पिता पुरुष है, पिता से सौ

गुनी जगन्माता होती है। इसी से राधा–कृष्ण, गौरी-ईश, ऐसा क्रम शास्त्रों में सुना जाता है, ना कि कृष्ण-राधा, शङ्कर-गौरी।

अतएव जो आदि में पुरुष वाचक शब्द उच्चारण करके पीछे प्रकृति वाचक शब्द मन्त्र में उच्चारण करते हैं वह मातृ-गामी अपराध के भागी होते हैं। वेदातिक्रमण अपराध महापराध है।

श्रीराधारूप लावण्य गुणादीन्वुक्तु मक्षमः,
तद्रूपादि माहात्म्यं च लज्जेऽह मपि नारद।
त्रैलोक्येतु समर्थोहि न मातुं वक्तु मर्हति,
तद्देह रूप माधुर्य्य जगन्मोहन मोहनम्।
यद्यनन्त मूखोऽपिस्यां तद्वक्तुं नास्ति मे गतिः,
लक्षशः कमलादास्यो यस्यासा लाक्षकी मता,
एवं शत सहस्राणामीश्वरी राधिका परा।

—पद्मपुराण १६२ अध्याय

श्रीराधानाम का रहस्य परम गूढ़ है इसके रहस्य को मनुष्य तो क्या देवता ऋषि मुनि भी जानने में अशक्त हैं। भगवान् शङ्कर स्वयं श्रीनारद जी से कहते हैं कि—श्रीराधा के रूप लावण्य और गुणादिकों को कहने में मैं सर्वथा अयोग्य हूँ। हे नारद! उनके अनेक रूपादिकों के माहात्म्य से मैं लज्जित हूँ। त्रिलोकी में माता के सम्बन्ध में कोई कहने को समर्थ नहीं। जिनका देह रूप और माधुर्य जगत् को मोहित करने वाले मोहन को भी मोहित करता है।

यदि मैं अनन्त मुख वाला भी हो जाऊँ तो भी कहने में मेरो सामर्थ्य नहीं है—लाखों का मत है कि उनकी लाखों लक्ष्मी दासियाँ हैं तथा सैकड़ों हजारों की ईश्वरी वह श्रीराधा परात्परा शक्ति हैं।

कृष्णार्चायां नाधिकारो यतोराधार्चनं विना,
वैष्णवैस्सकलै स्तमात् स सेव्यं राधिकार्चनं।
राध्नोति सकलान् कामान् तेन राधेति कीर्तिता।

—देवीभागवते ६ स्कन्धे ५० अध्याय

श्रीराधार्चन के बिना श्रीकृष्णार्चन का अधिकार नहीं है। इससे सब वैष्णवों को श्रीराधिका जी का अर्चन करना चाहिये। सब कामनाओं को पूर्ति करने वाली होने से उन्हें राधा कहा है।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ममानन्दमयी शक्तिः श्रीराधा प्रेमरूपिणी,
तपाति प्रेम पाशेना वशोहं वशीकृतः ।
—आदि पुराणे

मेरी आनन्दमयी शक्ति प्रेम रूपिणी हैं श्रीराधा। उनके प्रेम पाश के मैं वशीभूत हूँ।

वासना भाष्य में लिखा है—

इंदिरापति रानन्दपूर्णो वृन्दावने प्रभु नन्दयामास नन्दादीन्। अत्र इन्दिरापतिः राधापतिस्सन् नन्दयामासेत्यर्थः।

इन्द्रापति कृष्ण ने व्रज में नन्दादिक गोपों को आनन्द दिया। यहां इन्दिरापति से श्रीराधापति कृष्ण का ही तात्पर्य है।

२८—रसशास्त्र द्वारा 'राधा' यथा—

यः आनंदांशे ह्लादिनी तस्य श्रद्धादि क्रमे नवम भूमिका प्राप्तो सारो प्रेमा। प्रेम्णः। रति, स्नेह, मान, प्रणय, राग, अनुरागादि मिश्रणेन सप्तम कक्षा प्राप्तः। प्रेम्णसारो भावः। भावस्यपराकाष्ठा महाभावः।

तयोरुभययोर्मध्ये राधिका सर्वसाधिका
महाभाव स्वरूपेयं गुणै रति वरीयसि।
उज्ज्वलनीलमणौ श्रीमद्वृन्दावनेश्वरी प्रकरणे २ अङ्के
महाभावः स्वरूपाहिं श्रीराधा परदेवता
खनिः सर्व गुणानां सा कृष्ण कान्ता शिरोमणिः।
यस्याः चित्तेन्द्रियाङ्गानि श्रीकृष्णः प्रेम भावितं
क्रीड़ा सहायः कृष्णस्य स्वशक्तिः सैव राधिका॥
श्रीचैतन्यचरितामृते आदि लीलायां चतुर्थ परिच्छेदे

कृष्णस्यसुखे पीड़ाशङ्कया निमिषस्यापि-असहिष्णुतादिकं यत्र स रूढ़ो महाभावः। यथा—"क्षणं युगशतमिव" श्रीशुकेनदर्शितमिति।

कोटि ब्रह्माण्ड गतं समस्त सुखं यस्य सुखस्य लेशोऽपि न भवति समस्त वृश्चिक सर्पादि दंशकृत दुःखमपि यस्य दुःखस्य लेशो न भवति एवं भूते कृष्ण संयोग वियोगयोः सुख दुःखे यस्मो भवति दुसहः प्रेष्ठ विरहः अच्युताश्लेशनिर्वृत्येति शुकेन कथितं सोऽधि रूढ़ो

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

महाभावः तस्य मोहन मादनौ द्वे स्वरूपे। मोदनः राधिकायूथे। प्रायो वृन्दावनेश्वर्या मादनोऽयं मुदञ्चति।

श्रीरूपगोस्वामिपादेन—उज्वले वृन्दावनेश्वरी प्रकरणे

जो श्रीकृष्ण की आनन्दांश में ह्लादिनी शक्ति है, उसे साधन भक्ति या श्रद्धा, साधुसङ्ग, भजन–क्रिया, अनर्थ निवृत्ति, निष्ठा, रुचि, आसक्ति, भाव की नवम भूमिका प्राप्त सार रूप 'प्रेम-लक्षणा भक्ति' या प्रेम कहते हैं।

उसी प्रेम की रति, स्नेह, मान, प्रणय, राग, अनुराग के मिश्रण से सप्तम कक्षा प्राप्त परमोत्कर्ष अवस्था का नाम भाव है।

उस भाव की चरम सीमा को 'महाभाव' कहते हैं। वह श्री-ब्रजदेवियों में ही रहता है। इन ब्रजदेवियों के मध्य श्रीराधा और चन्द्रावली दोनों प्रधान हैं। जिनमें श्रीराधा मधुवत् स्नेहमयी होने से श्रीकृष्णचन्द्र के सब मनोरथों की पूर्ति करने वाली हैं। यह महा-भाव स्वरूपा हैं। गुणों में अति श्रेष्ठ हैं। निश्चय महाभाव स्वरूपा श्रीराधा परदेवता रूप हैं, सब गुणों की खान कृष्ण कान्ताओं में शिरोमणि हैं, जिनका मन-इन्द्रिय कृष्ण प्रेम में भावित है। अर्थात् जिसमें भावना दे दी जाती है उसमें उस औषधि की सब शक्ति आ जाती है, इसी प्रकार क्रीड़ा की सहायक स्वरूप शक्ति श्रीराधिका ही हैं। (ऐसा श्रीचैतन्यचरितामृत के आदि लीला के ४ परिच्छेद में लिखा है।)

कृष्ण के सुख में विघ्न पड़ता होगा अतः एक पलक का भी विरह सहने में असहिष्णुता का नाम रूढ़ महाभाव है (जैसा कि—'क्षण' युग शत हो गये श्रीकृष्ण के बिना गोपियों को, श्रीशुकदेव जी ने कहा है।)

करोड़ों ब्रह्माण्डों के समस्त सुख जिस सुख के सामने अत्यन्त तुच्छ हो जाएं, सर्प बिच्छुओं के काटने का दुःख जिसके सामने अत्यन्त तुच्छ हो जाय ऐसी श्रीकृष्ण के संयोग और वियोग की अवस्था का नाम अधिरूढ़ महाभाव है (जिसे कि—दुःसह प्रेष्ठ विरह और अच्युत के मिलन का आनन्द कहकर श्रीशुकदेव जी ने दिखलाया है।)

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

उसी अधिरूढ़ महाभाव के मोदन और मादन दो स्वरूप हैं। मोदन श्रीराधिका यूथ में और मादनाख्य अधिरूढ़ महाभाव श्रीस्वामिनी राधिकाजी में ही विराजता है।

अतः 'रस प्रकरण में'—इन्हें रस की आश्रय और श्रीकृष्ण को विषयालम्बन नाम से कहा है।

यस्या चित्तेन्द्रियाणि श्रीकृष्ण प्रेम भावितं यथा—

विशाखा प्रति राधायाः वाक्यं—

सौन्दर्य्यामृत सिन्धुभङ्ग ललना चित्ताद्रि संप्लावकः
कर्णानन्दि स नर्म रम्य वचनः कोटीन्दु शीताङ्गकः
सौरभ्यामृत संप्लवावृत जगत् पीयूष रम्याधरः
श्रीगोपेन्द्रसुतः सकर्षति बलात् पञ्चेन्द्रियाण्यालि मे ॥
नवाम्बुद लसद्द्युतिर्नव तडिन्मनोज्ञाम्बरः
त्रिभङ्ग मधुराकृतिर्मधुर वन्यवेशोज्ज्वलः
सुधांशु मधुराननः कमल कान्ति जिल्लोचनः
स मे मदन मोहनः सखि तनोति नेत्र स्पृहाम् ॥
नदज्जलद निःस्वन श्रवण कर्षि सत् सिञ्चितः
स नर्म रस सूचिकाक्षर पदार्थभङ्गयुक्तिकः
रमादिक वराङ्गना हृदय हारि वंशी कलः
स मे मदन मोहनः सखि तनोति कर्ण स्पृहाम् ॥
कुरङ्ग मद जिद्वपुः परिमलोर्मिकृष्टाङ्गनः
स्वकाङ्ग नलिनाष्टके शशि युताब्ज गन्ध प्रथः
मदेन्दु वर चन्दनागुरु सुगन्ध चर्चार्चितः
स मे मदन मोहनः सखि तनोति नासा स्पृहाम् ॥
हरिन्मणि कपाटिका प्रतत हारि वक्षस्थलः
स्मरार्त तरुणी मनः कलुष हन्तृदोरर्गलः
सुधांशु हरि चन्दनोत्पल सिताभ्र शीताङ्गकः
स मे मदन मोहनः सखि तनोति वक्षः स्पृहाम् ॥
व्रजातुल कुलाङ्गनेतर रसालि तृष्णाहरः
प्रदीव्यदधरामृतः सुकृतिलभ्य फेलालवः
सुधाजिदहि वाल्लिका सुदल वीटिका चर्वितः

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

स मे मदन मोहनः सखि तनोति जिह्वा स्पृहाम् ।।

श्रीगोविन्द लीलामृते

हे सखि ! जिन प्रियतम श्रीकृष्ण का सौन्दर्यामृत समुद्र ललनाओं के चित्त रूपी पर्वत को डुबाने वाला है, कानों को आनन्द देने वाले जिनके परिहास मय वचन हैं, जिनके सुगन्धित अङ्ग करोड़ों चन्द्रों की शीतलता के समान हैं, जिसका अमृतमय रम्य अधर सब जगत् को आप्लावित करने वाला है, वह गोपेन्द्रनन्दन वलपूर्वक मेरी पांचों इन्द्रियों को खेंच रहे हैं ।

जिनका नवीन मेघसा श्याम अङ्ग है, नवीन विद्युत् की आभा वाला मन मोहक पीताम्बर है, जिनकी त्रिभङ्ग मधुर आकृति है, मधुर वन के फूलों से सजाया गया 'चन्द्रमा सा मधुर आनन', कमल की कान्ति को जीतने वाले जिनके लोचन—वह मदनमोहन, हे सखि ! मेरे नेत्रों के दर्शन की स्पृहा को बढ़ा रहे हैं ।

गम्भीर मेघ की भांति गर्जन युक्त कानों को आकर्षित करने वाले एवं परिहास रस को सूचित करने वाले पदार्थ भङ्गि युक्ति-युक्त जिनके वचन हैं, रमादिक वराङ्गनाओं के हृदय को हरने वाली जिनकी वंशी ध्वनि है, वह मदनमोहन, हे सखि ! मेरे कानों की सुनने की स्पृहा बढ़ा रहे हैं ।

मृग के उमङ्ग को जीतने वाला जिसका वपु है, जिनकी अङ्ग परिमल कमलादिक सौगन्धियुत चन्दन अगरु द्वारा चर्चित अङ्गनाओं को आकृष्ट करती है, वह मदनमोहन, हे सखि ! मेरी नासिका की सूँघने की स्पृहा को बढ़ा रहे हैं ।

इन्द्रनील मणि के कपाट के समान जिनका वृहत् वक्षस्थल है, स्मरार्त तरुणियों के मन के कल्मष को दूर करने वाला दोनों भुजा रूपी अर्गला (बेड़ा) जिसमें लगे हैं, चन्द्रमा, चन्दन, कमल, कर्पूरादि शीतल करने वाली वस्तुओं के समान शीतलकारी जिनका अङ्ग है, वह मदनमोहन, हे सखि ! मेरे वक्षोज के मिलन की स्पृहा को बढ़ा रहे हैं ।

व्रज की अखिल कुलाङ्गनाओं की तृष्णा को हरने वाला जिनका अधरामृत है, उस फेलालव को सुकृती ही पा सकते हैं, अमृत

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

को जीतने वाली सौगन्धियुक्त वीटिका जो मुख में चबा रहे हैं, वह मदनमोहन, हे सखि ! मेरी जिह्वा के रसास्वादन की स्पृहा को बढ़ा रहे हैं।

अथ वृन्दावनेश्वर्य्या कीर्त्यन्ते प्रवरा गुणाः
मधुरेयं नववयाश्चलापांगोज्वल स्मिता।
चारु सौभाग्य रेखाढ्या गन्धोन्मादित माधवा
संगीत प्रवराभिज्ञा रम्यवाक् नर्म पण्डिता।
विनीता करुणापूर्णा विदग्धा पाटवान्विता
लज्जा शीला सुमर्यादा धैर्य गाम्भीर्य्य शालिनी।
सुविलासा महाभाव परमोत्कर्ष तर्षिणी
गोकुल प्रेम वसतिर्जगत् श्रेणी लसद् यशा।
गुर्वापित गुरुस्नेहा सखी प्रणयिता वशा
कृष्ण प्रिया वली मुख्या सन्तताश्रव केशवा।
वहुना किं गुणा स्तस्या संख्यातीता हरेरिव।

उज्ज्वलनीलमणौ कृष्णवल्लभा प्रकरणे

अब वृन्दावनेश्वरी श्रीराधिका जी के श्रेष्ठ गुणों का वर्णन करते हैं—

यह स्वरूप में परम मधुर नव अवस्था से युक्ता हैं, चञ्चल अपाङ्ग कटाक्षयुक्त नयनों वाली हैं। मन्द हास्य युक्ता हैं, सुन्दर सौभाग्य के चिह्न जिस पर शोभित हैं ऐसे श्रीअङ्ग की गन्ध से श्री-माधव को उन्मत्त कर देती हैं। सङ्गीत शास्त्र में अग्रणीया हैं, इनके वचन रमणीय हैं। परिहास करने में पण्डिता हैं। विनय की मूर्ति हैं। कृपा से परिपूर्णा हैं। कार्य में परम चतुर पटु हैं। लज्जा जिनका स्वभाव है। मर्यादा से चलने वील हैं। धैर्य और गाम्भीय की मूर्ति हैं। सुन्दर विलास को बढ़ाने वाली हैं। महाभाव के परमोत्कर्ष को बढ़ाने वाली हैं। प्रेममय गोकुल में उनका निवास है। सब जगत् में इनका यश फैल रहा है। इन्होंने अपने को गुरुजनों को अर्पण कर दिया है। गुरुजनों में इनका स्नेह है। सखीगणों के प्रेम के यह वशी-भूत हैं, कृष्ण प्रियागणों में मुख्या हैं, सर्वदा केशव के गुण श्रवण में इनके कान लगे रहते हैं। विशेष क्या गुण वर्णन किये जाएँ श्री-स्वामिनी राधिकाजी के श्रीकृष्ण की तरह ही असंख्य गुण हैं।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

महाभाव स्वरूपेयं नित्यदा वार्षभानवी
सखी प्रणय सद्गन्ध वरोद्वर्तन सुप्रभा।
कारुण्यामृत वीचिभि स्तारुण्यामृत धारया
लावण्यामृतवन्याभिः स्नापिता ग्लापितेन्दिरा।
ह्री पट्ट वस्त्र गुप्तांगी सौन्दर्य्य घुसृणाञ्चिता
श्यामलोज्वल कस्तूरी विचित्रित कलेवरा।
कम्पाश्रु पुलक स्तम्भ स्वेद गदगद रक्तता
उन्मादो जाड्य मित्येतै रत्नैर्नवभिरुत्तमैः।
क्लृप्ता लंकृति संश्लिष्टा गुणाली पुष्पमालिनी
धीरा धीरात्व सद्वासः परवासैः परिष्कृता।
प्रच्छन्न मानधम्मिल्ला सौभाग्य तिलकोज्वला
कृष्ण नाम यशः श्राविश्रवनोल्लासि कर्णिका।
राग ताम्बूल रक्तोष्ठी प्रेय कौटिल्य कज्जला
प्रणय क्रोध सच्चोलो बन्ध गुप्ती कृतस्तनी।
नर्मभावित निष्यन्द स्मित कर्पूर वासिता
सौरभान्तर्गृहे गर्व पर्य्यङ्को परिलीलया।
निविष्टा प्रेम वैचित्र्य विचलत्तरलाञ्चिता
मध्यतात्म सखी स्कन्ध लीलादत्त कराम्बुजा।
श्यामा श्यामस्मरा मोदमधूली पारिपोषिका।

मुक्ताचरिते श्रीरघुनाथदासिना कथितं

यह श्रीस्वामिनी राधा वृषभानुनन्दिनी सर्वदा महाभाव स्वरूपा हैं। सहचरी गणों के प्रणय गन्ध मिश्रित सुन्दर उबटन से इनकी सुन्दर प्रभा झलक रही है। कारुण्यामृत की तरङ्गों से मुक्त तारुण्यामृत धारा में लावण्यामृत नदी में इन्हें स्नान कराया गया है। इसी से इन्दिरा भी लजाती है। लज्जा रूपी सुन्दर वस्त्र से इनका श्रीअङ्ग ढका गया है। सौन्दर्य का चन्दन चढ़ाया गया है। श्याम-सुन्दर के उज्ज्वल रस कस्तूरी से विचित्र पत्रभङ्ग कलेवर पर रचा गया है। कम्प, अश्रु, पुलक, स्तम्भ, स्वेद, गद्गदता, रक्तता, उन्माद, जाड्य, इन नवरत्नों के अलङ्कारों से श्रीअङ्ग अलंकृत किया गया है। गुणों के फूलों की फूलमाला पहिराई गई है। धीरा और अधीरा भाव ही इनके दोनों (लहंगा ओढ़नी) वस्त्र हैं। छिपा हुआ मन में

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

मान धम्मिल्ल (वेनी) है। सौभाग्य रूपी उज्वल तिलक (बैन्दी) है। कृष्णनाम रूपी कर्णफूल कर्णों में शोभित हैं। राग रूपी ताम्बूल से होठ रचे हुए हैं। प्रियतम के प्रति कुटिलता रूपी काजल नयनों में है। प्रणय क्रोध रूपी कञ्चुकी धारण किये हुये हैं। परिहास और मन्द हास्य रूपी कपूर की सुगन्धि आ रही है। गर्वरूपी पलङ्ग पर विराजमान हैं। प्रेमवैचित्री भाव के पङ्खे ढल रहे हैं। 'वयस्सन्धि-सखीमध्यावस्था' और लीलारूपी सखी के कन्धे पर श्रीहस्त रखे हुये हैं। ये श्यामा हैं अर्थात् प्राकृत अंश जिनका स्पर्श भी नहीं करता है। अप्राकृत चिन्मय कृष्णरूपी काम के मद में उन्मत्त हैं। श्याम-प्रेम का परिवेषण करने वाली हैं।

का कृष्णस्य प्रणय जनिभूः श्रीमती राधिकैका
कास्य प्रेय स्यनुपमगणा राधिकैका न चान्या।
जैभ्यं केशे दृशि तरलता निष्ठुरत्वं कुचेस्या
वाञ्छापूर्त्यै प्रभवति हरेः राधिकैका न चान्या॥

गोविन्दलीलामृते

कृष्णस्य प्रणयोत्पत्तिका। एका श्रीमती राधिका। अस्य कृष्णस्य का प्रेयसी। अनुपम गुणा राधिकैका। अन्या न। अस्या केशे कौटिल्यं हृदिन। अन्यासां हृदि कौटिल्यं केशे न। एवं दृशि तरलता कुचे निष्ठुर त्वं ज्ञेयं। हरेर्वाञ्छा पूर्त्यै एका राधिकैव प्रभवति नान्येति [टीकायाम्]

श्रीकृष्णचन्द्र के प्रेम की उत्पत्ति का स्थान कहाँ है ?—कहना पड़ेगा कि—श्रीराधिका ही हैं। श्रीकृष्ण की प्रेयसी कौन है ?—अनुपम गुण वाली श्रीराधिका हैं। अन्य नायिका नहीं। इनके वक्ष-स्थल पर केश कौटिल्य है हृदय में नहीं। और नायिकाओं के हृदय में कौटिल्य है केशों में नहीं। इस प्रकार नयनों में तरलता, वक्षो-जयों में काठिन्य जानना चाहिए। श्रीहरि की वाञ्छा पूर्ति करने वाली केवल श्रीमती राधिका ही हैं, अन्य नहीं।

इस प्रकार श्रीमती स्वामिनी राधिका जी के नाम तथा राधा तत्व पर विहङ्गम दृष्टि डाली गई है—श्रीबादरायणि शुक मुनि किशोरीजी के गुणगान की फल-स्तुति करते हुए सिद्धान्त निरूपण करते हैं कि—

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अनुग्रहाय भूतानां मानुषं देह मास्थितः
भजते तादृशीः क्रीड़ा याः श्रुत्वा तत्परो भवेत् ।

श्रीभा० १०-३३-३७ ॥

भूतानामैकान्तिक भक्तानां मदनुग्रहाय मानुषं देहं—अत्र देह शब्देन भावं ज्ञातव्यं । यथा कथितं—जहुर्देहं अत्र विरहभावस्यैव त्यागः । 'अष्टादश महादोषैः रहिता भगवत्तनूः' । आसमन्तात् सर्वदैव गोपजातित्व विशिष्टं नन्दात्मजोऽमितिस्थितः । यः तादृशी क्रीड़ा—तत्सुख सुखित्व मयी क्रीड़ा कुरुते । यां श्रुत्वा— उपासनं कृत्वा तत्परो राधादास्य भाव विशिष्टः उपासको भवेत् ।

ऐकान्तिक भक्तों पर अनुग्रह करने के लिये भगवान् श्रीकृष्ण चन्द्र ने—"मैं सर्वदा ही गोप जातित्व विशिष्ट नन्दात्मज हूँ ।" यह मानकर मानुष भाव धारण किया है । इसी से वे तत्सुख सुखित्वमयी क्रीड़ा करते हैं । उस उपासना का आचरण कर साधक राधादास्य भाव को ग्रहण करेगा ।

यहां देह शब्द का अर्थ भाव ही करना होगा । क्योंकि कृष्ण-प्रेयसियों ने रासलीला में विरह जन्य भाव का ही त्याग किया था । शास्त्र में अठारह दोषों से रहित भगवत्तनू होते हैं ।

॥ इति शम् ॥

□

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

※ श्रीराधिका महिमा ※

जयति श्रीराधिके सकल सुख साधिके,
तरुनि मनि नित्य नवतन किशोरी।
कृष्ण तनु लीन घन रूप की चातकी,
कृष्ण मुख हिम किरन की चकोरी॥
कृष्ण दृग भृङ्ग विश्राम हित पद्मिनी,
कृष्ण दृग मृगज बन्धन सुडोरी।
कृष्ण अनुराग मकरन्द की मधुकरी,
कृष्ण गुण गान रस सिन्धु बोरी॥
एक अद्‌भुत अलौकिक रीत मैं लखी,
मनसि स्यामल रङ्ग अङ्ग गोरी।
और आश्चर्य कहूँ मैं न देख्यो सुन्यो,
चतुर चौंसठ कला तदपि भोरी॥
विमुख पर चित्त ते चित्त जाको सदा,
करत निज नाह को चित्त चोरी।
प्रकृति यह 'गदाधर' कहत कैसे बनै,
अमित महिमा इतै बुद्धि थोरी॥

प्रिया शक्ति आह्लादिनी प्रिय स्वरूप आनन्द।
तन वृन्दावन जगमगै इच्छा सखी अनन्त॥
रूप बोल प्यारी बनी प्रियतम श्याम तमाल।
दुहु मन मिलि एकै भये श्रीराधावल्लभ लाल॥

× × ×

आज नीकी बनी श्री राधिका नागरी।
कमल दक्षिण भुजा वाम भुज अंस सखि॥
गावती सरस मिल मधुर सुर रागरी।
सकल विद्या विदित रहसि श्रीहरिवंश हित॥
मिलत नव कुन्ज वर श्याम बड़ भागरी॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अन्य प्रकाशन —

श्रीमद्वैष्णव सिद्धान्त रत्न संग्रह—(श्रीचैतन्यचरितामृत की भूमिका)

श्रीचैतन्य चरितामृत—(आदि-मध्य-अन्त्य लीला) महाप्रभु श्रीचैतन्य का जीवनवृत्त एवं चैतन्य सम्प्रदाय-सिद्धान्त का अनुपम ग्रन्थ ।

श्रीचैतन्य भागवत—सटीक, आदि मध्य अन्त्य खण्ड—महाप्रभु श्रीचैतन्य का लीला-वृत सरल-सहज अध्ययन ।

श्रीनिताई चाँद—(सचित्र) श्रीमन्नित्यानन्द प्रभु का सर्वांगीण तत्त्वांश, परिकरांश एवं उपासनांश । ६० भक्तों के अद्भुत जीवन चरित्र ।

महाप्रभु श्रीगौरांग—(सचित्र)—श्रीमन्महाप्रभु श्रीगौरांग आविर्भाव-पञ्च-शताब्दी पर मण्डल का अनुपम प्रकाशन ।

श्रीचैतन्य प्रेमसागर—पं० श्रीरामानन्द शास्त्री द्वारा लिखित सातभाग ।

श्रीगौर करुणा वैशिष्ट्य—महाप्रभु श्रीचैतन्य की जीवों पर की गयी विशेष करुणा ।

श्रीमहाप्रभु गौरांग चित्रावली—श्रीमन्महाप्रभु-सम्बन्धित ऐतिहासिक एवं अद्यतन ६३ चित्रों का संग्रह ।

श्रीशिक्षाष्टक—श्रीमहाप्रभु द्वारा रचित उनकी सभी रचनाएँ एकसाथ ।

श्रीगोपाल चम्पू—वृन्दावन लीलाओं का अनुपम ग्रन्थरत्न ।

श्रीबृहद्भागवतामृत—जीव का परम साध्य क्या है, उसका साधन क्या है—इस गूढ़ विषय की गोपकुमार नामक नायक के द्वारा सहज एवं बोध गम्य व्याख्या ।

श्रीकृष्णकर्णामृतम्—लीला शुक श्रीविल्वमङ्गल रचित अनुपम काव्य

श्रीमानसी सेवा—श्रीगौरगोविन्द अष्टयाम लीला स्मरण गुटिका (मानसिक सेवा)

श्रीवृन्दावन महिमामृतम्—श्रीप्रबोधानन्द सरस्वती-रचित श्रीवृन्दावन की महिमा विषयक मूल एवं सरल अनुवाद सहित प्रामाणिक ग्रन्थ ।

श्रीनरोत्तम-प्रार्थना—मूल एवं अनुवाद ।

श्रीप्रेमभक्ति चन्द्रिका—श्रीनरोत्तम ठाकुर-रचित मूल एवं अनुवाद ।

श्रीमद्भगवद्गीता—श्रीविश्वनाथ चक्रवर्तिपादकृत टीका एवं अनुवाद ।

श्रीतत्त्व-सन्दर्भ—मूल, अनुवाद, हिन्दी टीका सहित ।

श्रीभक्ति-सन्दर्भ—मूल, अनुवाद, टीका सहित । विषय एवं श्लोक सूची सहित ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

श्रीभगवत् संदर्भ—मूल, अनुवाद, टीका सहित ।